# समासप्रक्रियायां समासान्तानां स्थानम्

पवनकुमारः [1] के.वी. रामकृष्णमाचार्युलु[2] एवम् अम्बाकुलकर्णी[1]

[1] संस्कृताध्ययनविभागः,
हैदराबाद् विश्वविद्यालयः,
हैदराबाद्
[2] माननीयप्राध्यापकाः,
फ्रेन्च् इन्स्टिट्यूट् आफ् पाण्डिचेरि,
पाण्डिचेरि

# उपोद्घातः

1. समासप्रक्रिया
2. समासान्तानां स्थाननिर्धारणे मतभेदाः
3. समासान्तानां विषये भाष्यकाराणां मतम्
4. सिद्धान्तः

समस्तपदनिष्पादनाय काचित् प्रक्रिया वर्तते।

अस्यां समाससञ्ज्ञा प्रभृति समस्तपदं यावत् बहूनि सोपानानि भवन्ति ।

# अलौकिकविग्रहवाक्यम्

राजन्+सु महत्+सु

'राजन्+सु महत्+सु ' → `राजन्+सु महत्+सु टच् '

राजाहस्सखिभ्यष्टच्' (A.5.4.91)

'राजन्+सु महत्+सु टच्' समाससञ्ज्ञा

प्राक्कडारात्समासः (A2.1.3)

'राजन्+सु महत्+सु टच्' प्रातिपदिकसञ्ज्ञा

`कृत्तद्धितसमासाश्च' (A1.2.46)

# उपसर्जनसञ्ज्ञा

'राजन्+सु महत्+सु टच्' उपसर्जनसञ्ज्ञा

`प्रथमानिर्दिष्टं समास उपसर्जनम्' (A1.2.43)

`सन्महत्परमोत्तमोत्कृष्टाः पूज्यमानैः' (A.2.1.61)

## पूर्वनिपातः

'महत्+सु राजन्+सु टच्' पूर्वनिपातः

`उपसर्जनं पूर्वम्' A(2.2.30)

`युध्+ ङि स्थिर + सु' → ` युधि स्थिर + सु'

` हलदन्तात्सप्तम्याः सञ्ज्ञायाम्' (A6.3.9)

# सुब्लुक्

'महत् +सु राजन् +सु टच्' $\rightarrow$ 'महत् राजन् टच्'

` सुपो धातुप्रादिपदिकयोः' (A2.4.71)

'महत् राजन् टच्' $\rightarrow$ `महा राजन् अ'

'आन्महतः समानाधिकरणजातीययोः' (A.6.3.46)

# उत्तरपदकार्यम्

`महा राजन् अ' → `महा राज् अ'

` नस्तद्धिते' (A.6.4.144)

'राजन्  पुरुष' $\rightarrow$ राज पुरुष

` नलोपः प्रातिपदिकान्तस्य' (A8.2.7)

अस्मिन् सोपाने समस्तपदस्य लिङ्गं निश्चीयते ।

| समासप्रकारः | समस्तपदस्य लिङ्गम् |
|---|---|
| अव्ययीभावः | नपुंसकलिङ्गम् |
| तत्पुरुषः | उत्तरपदलिङ्गम् |
| बहुव्रीहिः | अन्यपदार्थादाधारितम् |
| द्वन्द्वः | उत्तरपदलिङ्गम् |

सोपानेऽस्मिन् संख्यायाः निर्धारणं भवति ।

| समासप्रकारः | संख्या(प्रायेण) |
|---|---|
| अव्ययीभावः | एकत्वसंख्या |
| तत्पुरुषः | एकत्वसंख्या |
| बहुव्रीहिः | विशेष्याधारिता |
| समाहारद्वन्द्वः | एकत्वसंख्या |
| इतरेतरद्वन्द्वः | द्वित्वसंख्या |

समासेऽपि कश्चन स्वरः भवति ।

| समासप्रकारः | स्वरः(प्रायेण) |
| --- | --- |
| अव्ययीभावः | पूर्वपदप्रकृतिस्वरः |
| तत्पुरुषः | अन्तोदात्तस्वरः |
| बहुव्रीहिः | पूर्वपदप्रकृतिस्वरः |
| द्वन्द्वः | पूर्वपदप्रकृतिस्वरः |

समासप्रक्रियायाम् अन्तिमं सोपानं भवति समस्तपदनिष्पादनम् ।

अत्र प्रथमाविभक्तिप्रत्ययस्य योजनेन समस्तपदं निष्पाद्यते ।

महाराज + सु $\rightarrow$ महाराजः

# समासप्रक्रियायां समासान्तानां स्थानम्



# सुब्लुक् एवम् उपसर्जनसञ्ज्ञयोः क्रमनिर्धारणे मतभेदाः

सुब्लुक् : `सुपो धातुप्रातिपदिकयोः' (A.2.4.71)

`प्रत्ययलोपे प्रत्ययलक्षणम्' (A.1.1.62)

उपसर्जनसञ्ज्ञा : ` प्रथमानिर्दिष्टं समास उपसर्जनम्' (A.1.2.43)

बहु + कुमारी + जस्

1. `नद्यृतश्च' (A5.4.153)
   बहु + कुमारी + जस् कप्
2. `गोस्त्रियोरुपसर्जनस्य' (A1.2.48)
   कुमारी $\rightarrow$ कुमारि

महाभाष्यम् :`कपि च प्रतिषेधो वक्तव्यः' ` गोस्त्रियोरुपसर्जनस्य' (A1.2.48) इति सूत्रभाष्ये ` कपि च' इति वार्तिके

बहु कुमारी + जस् कप्

1. आक्षेपः

   ह्रस्वः अन्तरङ्गः
   कप् : बहिरङ्गः

   बाधकः कप् : अन्तरगङ्गतरः

2. कप् समासान्तप्रत्ययो न
   ` तादर्थ्यात् ताच्छब्द्यं भवति । येषां पदानां समासः न तावत्तेषामन्यद्भवति कपं तावत् प्रतीक्षते ' इति ।

नन्वेतत् ` द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ' (A6.2.197) इति सूत्रभाष्येण विरुध्यते ।

द्वित्रिभ्यां परेषु पात्, दत् , मूर्धन् इत्येतेषु उत्तरपदेषु परेषु अन्तोदात्तः विकल्पेन भवति बहुव्रीहौ इति सूत्रार्थः । 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (A6.2.1) इत्यस्यापवदोऽयं योगः । तथाहि `द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहौ' (A6.2.197) इत्यत्र उपात्तः मूर्धन् शब्दः कृतसमासान्तः उत नेति विचिकित्सा भवति ।

तत्र भाष्ये - ` किमिदं द्वित्रिभ्यां मूर्धन्यकारान्तग्रहणम्, आहोस्विन्नकारान्तग्रहणम् ? कश्चात्र विशेषः ?' ।

अत्र सूत्रे कार्यी कः नकारान्तः उत अकारान्तः इति विचार्यते । अकृतसमासान्ते नकारान्तनिर्देशे सति समासेषु नकारान्तरूपाभावादकारस्यैव कार्यित्वमिति पर्यवसन्नं भवति ।

समासः कार्यी नित्यः समासान्तः इति यदि स्वीक्रियेत तर्हि नकारान्तस्य साधुत्वमेवं स्वरश्च वक्तव्यः भवति । यदि तथा न स्यात्तर्हि समासान्तस्य नित्यत्वात् नकारान्तस्यासाधुत्वप्रसङ्गः स्यात् ।

यदि उत्तरपदस्य कार्यित्वमङ्गीक्रियते तदा आदौ अन्तोदात्तत्वं कर्तव्यं वा उत समासान्तः इति चेत् परत्वादन्तोदात्तत्वम्, अन्तोदात्तत्वे कृते समासान्तः , टिलोपे कृते उदात्तनिवृत्तिस्वरेणा उदात्तत्वं समासान्तस्य सिद्धम्।

अलौकिकविग्रहवाक्य एव समासान्तानां प्रवृत्तेः परत्वात् स्वरः इति कथं सङ्गच्छते? तस्मात् समासप्रवृत्यनन्तरमेव समासान्ता इति चेन्न । `गोस्त्रियोरुपसर्जनस्य' (A1.2.48) इति सूत्रभाष्यविरोधेनैतत्भाष्यस्यैकदेशियुक्तित्वमङ्गीक्रियते इति तद्भाष्योद्योते नागेशः ।

# समासान्तानां विषये दीक्षिताशयः

प्रौढमनोरमायां तावत् समासान्ताः समासानामवयवतया, एवञ्चोत्तरपदानामवयवतया च प्रवर्तन्ते इति पक्षद्वयमपि स्वीकृतम्

समासान्ताः समासानामवयवाः इत्यत्र प्रयोजनं तावत् उपशरदम् इति ।
अलौकिकविग्रहः : [शरद्+ङस् उप + सु]
समासान्तप्रत्ययः : [ शरद्+ङस् उप+सु [टच्] ]
समाससञ्ज्ञा :[ शरद्+ङस् उप+सु [टच्]]
प्रातिपदिकसञ्ज्ञा : `[शरद्+ङस् उप+सु अ ]'
उपसर्जनसञ्ज्ञा : [शरद्+ङस् उप+सु अ]
पूर्वनिपातः : [उप+सु शरद्+ङस् अ]
सुब्लुक् : [उप शरद् अ]
सन्धिकार्यम् :उपशरद
लिङ्गनिर्धारणम् :उपशरद , नपुंसकलिङ्गम्
विभक्तिकार्यम् :उपशरद+सु $\rightarrow$ उपशरदम् ।

उत्तरपदस्यावयवत्वमिति पक्षे उपशरदम् इति न सिध्यति ।

अलौकिकविग्रहः : [शरद्+ङस् उप + सु]
समाससञ्ज्ञा : ['शरद्+ङस् उप + सु']
प्रातिपदिकसञ्ज्ञा : `[शरद्+ङस् उप+सु ]'
उपसर्जनसञ्ज्ञा : [शरद्+ङस् उप+सु]
पूर्वनिपातः : [उप+सु शरद्+ङस् ]
समासान्तप्रत्ययः : [उप+सु (शरद्+ङस् ]टच् )
सुब्लुक् : [उप (शरद् ]अ)
सन्धिकार्यम् : उप (शरद् अ)
लिङ्गनिर्धारणम् : उप(शरद् अ)
विभक्तिकार्यम् : उपशरद् + अ

समासान्ता उत्तरपदस्यावयवा इति पक्षस्य स्वीकारादेव ` द्विपुरी' ` द्विधुरी' इत्यादौ `अकरान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति वार्तिकेन ङीप् सिध्यति ।

अलौकिकविग्रहः : [द्वि + ओस् पुर् + ओस्]
समासान्तप्रत्ययः: [द्वि + ओस् (पुर् + ओस्] अ )
समाससञ्ज्ञा :[`द्वि + ओस् (पुर् + ओस्'] अ )
प्रातिपदिकसञ्ज्ञा :[द्वि + ओस् (पुर् + ओस्] अ )
उपसर्जनसञ्ज्ञा: [द्वि + ओस् (पुर् + ओस्] अ )
पूर्वनिपातः: [द्वि + ओस् (पुर् + ओस्] अ )
सुब्लुक्: [द्वि (पुर्] अ )
सन्धिकार्यम् :[ द्वि (पुर)]
लिङ्गनिर्धारणम् :[द्वि (पुर)], स्त्रीलिङ्गम्
विभक्तिकार्यम् : [ द्वि (पुर]→ द्विपुरी।

# सिद्धान्तः

वस्तुतस्तु दीक्षितोक्तः द्वितीयपक्षः समासान्ताः उत्तरपदस्यावयवा इति स भाष्यसम्मतः नास्ति ।

`द्विपुरी' ` द्विधुरी' इति विषये तावत् द्विगोः (A.4.1.21) इति सूत्रे द्विगोरकारान्तात् प्रातिपदिकात् स्त्रियां ङीप् स्यात् इति भाष्यविवरणादेवं ज्ञायते यत् समासान्ताः समासस्यैवान्तावयवाः इति ।

एवञ्चालौकिकविग्रहवाक्य एव एते प्रवर्तन्ते इति च सिद्धान्तः ।

धन्यवादः